श्री

शिवमहिम्नस्तोत्रम् ५.८

प्रारम्भः

श्री शिवमहिम्नस्तोत्र प्रारम्भः

महिम्नः पारं ते परमविदुषो यद्यसदृशी –
स्तुतिर्ब्रह्मादीनामपि तदवसन्नास्त्वयि गिरः ॥
अथावाच्यः सर्वः स्वमतिपरिणामावधि गृणन् –
ममाप्येष स्तोत्रे हर निरपवादः परिकरः ॥१॥
अतीतः पन्थानं तव च महिमा वाङ्मनसयो –
रतद्व्यावृत्त्या यं चकितमभिधत्ते श्रुतिरपि ॥
स कस्य स्तोतव्यः कतिविधगुणः कस्य विषयः –
पदे त्वर्वाचीने पतति न मनः कस्य न वचः ॥ २॥
मधुस्फीता वाचः परमममृतं निर्मितवत –
स्तव ब्रह्मन् किं वागपि सुरगुरोर्विस्मयपदम् –
मम त्वेतां वाणीं गुणकथनपुण्येन भवतः –

पुनामीत्यर्थेऽस्मिन् पुरमथन बुद्धिर्व्यवसिता ॥३॥

तवैश्वर्यंयत्तज्जगदुदयरक्षाप्रलयकृत-
त्रयीवस्तुव्यस्तंतिस्रषुगुणाभिन्नासुतनुषु।
म
अभव्यानामोस्मिंवरदरमणीयामरमणीं-
विहन्तुंव्याक्रोशीविदधतइहैकेजडधियः॥४॥
किमीहःकिंकायःसखलुकिमुपायस्त्रिभुवनं-
किमाधारोधातासृजतिकिमुपादानइति च।
अतर्क्यैश्वर्येत्वय्यनवसरदुःस्थोहतधियः-
कुतर्कोऽयंकांश्चिन्मुखरय।

ति मोहाय जगतः ॥ ५ ॥ अजन्मानो लोकाः किम-

वयववन्तोऽपि जगतामधिष्ठातारं किं भवविधिर-
नादृत्य भवति ॥ अनीशो वा कुर्याद्भुवनजनने कः
परिकरो यतो मन्दास्त्वां प्रत्यमरवर संशेरत इमे ॥
६ ॥ त्रयी साङ्ख्यं योगः पशुपतिमतं वैष्णव-
मिति प्रभिन्ने प्रस्थाने परमिदमदः पथ्यमिति च ॥
रुचीनां वैचित्र्यादृजुकुटिलनानापथजुषां नृणामेको
गम्यस्त्वमसि पयसामर्णव इव ॥ ७ ॥ महोक्षः
खट्वाङ्गं परशुरजिनं भस्मफणिनः कपालं चेतीयत्त-
व वरद तन्त्रोपकरणम् । सुरास्तां तामृद्धिं विदधति

चकितदेवासुरकृपाविधेयस्याऽऽसीद्यस्त्रिनयन विषं संहत वतः ॥ सकल्माषः कण्ठे तव न कुरुते न श्रियमहो विकारोऽपि श्लाघ्यो भुवनभयभङ्गव्यसनिनः ॥ १४ ॥ असिद्धार्था नैव क्वचिदपि सदेवासुरनरे निवर्तन्ते नित्यं जगति जयिनो यस्य विशिखाः ॥ स पश्यन्नीश त्वामितरसुरसाधारणमभूत् स्मरः स्मर्तव्यात्मा नहि वशिषु पथ्यः परिभवः॥१५॥ महीपादाघाताद्व्रजति सहसा संशयपदं पदं विष्णोर्भ्राम्यद्भुजपरिघरुग्णग्रहगणम् ॥ मुहुर्द्यौर्दौस्थ्यं यात्यनिभृतजटाताडिततटा जगद्रक्षायै त्वं-

नटसि ननु वामैव विभुता ॥ १६ ॥ वियद्व्यापी
तारागणगुणितफेनोद्गमरुचिः प्रवाहो वारां यः पृष-
तलघुदृष्टः शिरसि ते ॥ जगद्द्वीपाकारं जलधिव-
लयं तेन कृतमित्यनेनैवोन्नेयं धृतमहिम दिव्यं
तव वपुः ॥ १७ ॥ रथः क्षोणी यन्ता शतधृतिरगेन्द्रो
धनुरथो रथांगे चन्द्रार्कौ रथचरणपाणिः शर इति ।
दिधक्षोस्तेकोऽयं त्रिपुरतृणमाडम्बरविधिर्विधेयैः
क्रीडन्त्यो न खलु परतन्त्राः प्रभुधियः ॥१८॥ हरि-
स्ते साहस्रं कमलबलिमाधाय पदयोर्यदेकोने त-
स्मिन्निजमुदहरन्नेत्रकमलम् ॥ गतो भक्त्युद्रेकः

परिणतिमसौ चक्रवपुषा त्रयाणां रक्षायै त्रिपुरहर
जागर्ति जगताम् ॥ १९ ॥ क्रतौ सुप्ते जाग्रत्त्वम-
सि फलयोगे क्रतुमतां क्व कर्मप्रध्वस्तं फलति
पुरुषाराधनमृते ॥ अतस्त्वां संप्रेक्ष्य क्रतुषु फल-
दानप्रतिभुवं श्रुतौ श्रद्धां बध्वा दृढपरिकरः कर्मसु-
जनः ॥ २० ॥ क्रियादक्षो दक्षः क्रतुपतिरधीशस्त-
नुभृतामृषीणामार्त्विज्यं शरणद सदस्याः सुरगणाः ॥
क्रतुभ्रंशस्त्वत्तः क्रतु फलविधानव्यसनिनो ध्रुवं कर्तुः
श्रद्धाविधुरमभिचाराय हि मखाः ॥ २१ ॥ प्रजाना-
थं नाथ प्रसभमभिकं स्वां दुहितरं गतं रोहिद्भूतां

रिरमयिषुमृष्यस्य वपुषा । धनुष्पाणेर्यातं दिव-
मपि सपत्राकृतममुं त्रसन्तं तेऽद्यापि त्यजति न
मृगव्याधरभसः ॥ २२ ॥ स्वलावण्याशंसा धृतध-
नुषमह्नाय तृणवत्पुरः प्लुष्टं दृष्ट्वा पुरमथन पुष्पा
युधमपि । यदि स्त्रैणं देवीयमनिरतदेहार्धघटना-
दवैति त्वामद्धा बत वरद मुग्धा युवतयः ॥ २३ ॥
श्मशानेष्वाक्रीडा स्मरहर पिशाचाः सहचराश्चिता-
भस्मालेपः स्रगपि नृकरोटीपरिकरः ॥ अमंगल्यं
शीलं तव भवतु नामैवमखिलं तथापि स्मर्तृणां
वरद परमं मंगलमसि ॥ २४ ॥ मनः प्रत्यक्चित्ते

सविधमविधायात्तमरुतः प्रहृष्यद्रोमाणः प्रमदस-
लिलोत्सङ्गितदृशः ॥ यदालोक्याह्लादं ह्रद इव
निमज्याममृतमये दधत्यन्तस्तत्त्वं किमपि यमिन-
स्तत्किल भवान् ॥ २५ ॥ त्वमर्कस्त्वं सोमस्त्वमसि
पवनस्त्वंहुतवहस्त्वमापस्त्वं व्योम त्वमुधरणिरा-
त्मा त्वमिति च ॥ परिच्छिन्नामेवं त्वयि परिणता
बिभ्रति गिरं न विद्मस्तत्तत्त्वं वयमिह तु यत्त्वं न
भवसि ॥ २६ ॥ त्रयीं तिस्रो वृत्तीस्त्रिभुवनमथो
त्रीनपि सुरानकाराद्यैर्वर्णैस्त्रिभिरभिदधत्तीर्णविकृति ॥
तुरीयं ते धाम ध्वनिभिरवरुन्धानमणुभिः समस्त

व्यस्तं त्वां शरणद गृणात्योमिति पदम् ॥ २७ ॥भवः
शर्वो रुद्रः पशुपतिरथोग्रः सहमहांस्तथा भीमेशा
नाविति यदभिधानाष्टकमिदम् ॥ अमुष्मिन् प्रत्ये
कं प्रविचरति देव श्रुतिरपि प्रियायास्मै धाम्ने
प्रणिहितनमस्योऽस्मि भवते ॥ २८ ॥ नमो नेदिष्ठा
य प्रियदवदविष्ठाय च नमो नमः क्षोदिष्ठाय स्मर-
रहर महिष्ठाय च नमः ॥ नमो वर्षिष्ठाय त्रिनयन-
यविष्ठाय च नमो नमः सर्वस्मै ते तदिदमिति
शर्वाय च नमः ॥ २९ ॥ बहलरजसे विश्वोत्पत्तौ
भवाय नमो नमः प्रबलतमसे तत्संहारे हराय नमो

नमः ॥ जनसुखकृते सत्त्वोद्रिक्तौ मृडाय नमो नमः
प्रमहसि पदे निस्त्रैगुण्ये शिवाय नमो नमः ॥३०॥
कृशपरिणति चेतः क्लेशवश्यं क्व चेदं क्व च तव गुण-
सीमोल्लङ्घिनीशश्वदृद्धिः ॥ इति चकितममन्दीकृ-
त्य मां भक्तिराधाद्वरदचरणयोस्ते वाक्यपुष्पोपहा
रम् ॥ ३१ ॥ असितगिरिसमं स्यात्कज्जलं सिन्धुपा
त्रे सुरतरुवरशाखा लेखनी पत्रमुर्वी ॥ लिखति यदि
गृहीत्वा शारदा सर्वकालं तदपि तव गुणानामीश
पारं न याति ॥ ३२ ॥ असुरसुरमुनीन्द्रैरर्चितस्येन्दु
मौलेर्ग्रथितगुणमहिम्नो निर्गुणस्येश्वरस्य ॥ सक-

ल गुणवरिष्ठः पुष्पदन्ताभिधानो रुचिरमलघुवृत्तैः
स्तोत्रमेतच्चकार ॥ ३३ ॥ अहरहरनवद्यं धूर्जटेः
स्तोत्रमेतत् पठति परमभक्त्या शुद्धचित्तः पुमान्
यः ॥ स भवति शिवलोके रुद्रतुल्यस्तथात्र
प्रचुरतरधनायुः पुत्रवान् कीर्तिमांश्च ॥ ३४ ॥ महे-
शान्नापरो देवो महिम्नो नापरा स्तुतिः ॥ अघो-
रान्नापरो मन्त्रो नास्ति तत्त्वं गुरोः परम् ॥ ३५ ॥
दीक्षा दानं तपस्तीर्थं ज्ञानं यागादिकाः क्रियाः ॥
महिम्नः स्तवपाठस्य कलां नार्हन्ति षोडशीम् ॥
३६ ॥ कुसुमदशननामा सर्वगन्धर्वराजः शिशुशशधर-

वरमौलेर्देवदेवस्य दासः ॥ स खलु निजमहिम्नो
भ्रष्ट एवास्यरोषात्स्तवनमिदमकार्षीद्दिव्य दिव्यं
महिम्नः ॥ ३७ ॥ सुरवरमुनिपूज्यं स्वर्गमोक्षै-
कहेतुं पठति यदि मनुष्यः प्राञ्जलिर्नान्यचेताः ॥
व्रजति शिवसमीपं किन्नरैः स्तूयमानः स्तवनमि
दममोघं पुष्पदन्तप्रणीतम् ॥ ३८ ॥ श्रीपुष्पदन्त-
मुखपंकजनिर्गतेन स्तोत्रेण किल्विषहरेण हर-
प्रियेण ॥ कण्ठस्थितेन पठितेन समाहितेन सुप्री-
णितो भवति भूतपतिर्महेशः ॥ ३९ ॥ इत्येषा वा
ङ्मयी पूजा श्रीमच्छङ्करपादयोः ॥ अर्पिता तेन

मे देवः प्रीयतां च सदाशिवः ॥ ४० ॥ इति श्रीस्कन्दपुराणे पुष्पदन्तगन्धर्वराजविरचिते श्रीशिवमहिम्नाख्यं स्तोत्रं संपूर्णम् ॥ श्रीसदाशिवार्पणमस्तु ॥ श्रीरस्तु ॥

श्रीगणेशायनमः ॥ अथ वेदसारशिवस्तोत्रप्रारम्भः ॥

पशूनां पतिं पापनाशं परेशं गजेन्द्रस्य कृत्तिं वसानं वरेण्यम्। जटाजूटमध्ये स्फुरद्गाङ्गवारिं महादेवमेकं स्मरामि स्मरारिम् ॥१॥ महेशं सुरेशं सुरारातिनाशं विभुं विश्वनाथं विभूत्यङ्गभूषम् । विरूपाक्षमीन्द्वर्कवन्हित्रिनेत्रं सदानन्दमीडे प्रभुं पञ्चवक्त्रम् ॥ २ ॥ गिरीशं गणेशं गले नीलवर्णं गजेन्द्राधिरूढं गुणातीतरूपम् । भवं भास्वरं भस्मना भूषिताङ्गं भवानीकलत्रं भजे पञ्चवक्त्रम् ॥३॥ शिवाकान्त शम्भो शशाङ्कार्धमौले महेशान शूलिन् जटाजूटधारिन् ॥ त्वमेको जगद्व्यापको विश्वरूप प्रसीद प्रसीद प्रभो पूर्णरूप ॥ ४ ॥ परात्मानमेकं जगद्बीजमाद्यं निरीहं निराकारमोङ्कारवेद्यम् । यतो जायते पाल्यते येन विश्वं तमीशं भजे लीयते यत्र विश्वम् ॥ ५ ॥ न भूमिर्न चापो न वह्निर्न वायुर्न चाकाशमास्ते न तन्द्रा न निद्रा न ग्रीष्मो न

शीतं न देशो न वेशो न यस्यास्ति मूर्त्तिस्त्रिमूर्तिं तमीडे ॥ ६ ॥ अजं शाश्वतं
कारणं कारणानां शिवं केवलं भासकं भासकानाम् ॥ तुरीयंतमः पारमाद्यन्तहीनं
प्रपद्येपरं पावनं द्वैतहीनम् ॥ ७ ॥नमस्ते नमस्ते विभो विश्वमूर्ते नमस्ते नमस्ते
विज्ञानन्दमूर्ते ॥ नमस्ते नमस्तेतपोयोगगम्यं नमस्ते नमस्तेश्रुतिज्ञानगम्यम् ॥ ८॥
प्रभो शूलपाणे विभो विश्वनाथं महादेव शम्भो महेश त्रिनेत्र ॥ शिवाकन्ता शान्त
स्मरारे पुरारे त्वदन्यो वरेण्यो न मान्योन गण्यः ॥ ९ ॥ शम्भो महेश करुणामय
शूलपाणे गौरीपतिपशुपते पशुपाशनाशन् ॥ काशीपते करुणया जगदेतदेकस्त्वं
हंसि पासि विदधासि महेश्वरोऽसि ॥ १० ॥ त्वत्तो जगद्भवति देव भव स्मरारे
त्वय्येव तिष्ठति जगन्मृड विश्वनाथ ॥ त्वय्येव गच्छति लय जगदेतदीश लिङ्गा
त्मकं हर चराचर विश्वरूपिन् ॥ ११ ॥

इति श्रीमच्छङ्कराचार्यविरचितं वेदसाशिवस्तोत्रं संपूर्णम् ।